श्वेतयमानी सा अजमोदा इत्येव ख्याता। अपरा यमानी इत्येव ख्याता अविशेषात् हरोरपीति सुभूतिः। केचित्तु अजमोदादिहयं वनयमान्यौ ब्रह्मदर्भादिदयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृता श्वेतयमानिका इति। 'यमानी दीपको दीप्यो भूतिकश्च यमानिका।' इति च रत्नः। यच्छति विरमति निवर्त्तते अग्निमान्द्यमनया यमानी। यमौ उ विरतौ चाप्नोति अनट् ङीप् यमानी स्वार्थे के यमानिका यमानी पञ्चमवर्गपञ्चममध्या। यवानीति अन्तःस्थचतुर्थमध्या इति केचित्।" इति भरतः॥ * ॥ अस्या गुणाः। कुष्ठशूलनाशित्वम्। हृद्यत्वम्। पित्ताग्निकारित्वम्। वायुकफशमिनाशित्वञ्च। इति राजवल्लभः॥

यमानी, स्त्री, (यच्छति विरमति निवर्त्तते अग्निमान्द्यमनयेति। यम+करणे ल्युट्। ङीष्। पृषोदरादित्वात् साधुः।) यमानिका। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।
"यमानी दीपको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)

यमान्तकः, पुं, (यमस्यान्तकः। मृत्युञ्जयत्वादेवास्य तथात्वम्।) शिवः। इति शब्दरत्नावली॥ (यमश्च अन्तकश्च तौ इति विग्रहे। वैवस्वतकालौ। यथा, महाभारते। २। १७। १५।
"तेजसा सूर्य्यसङ्काशः क्षमया पृथिवीसमः।
यमान्तकसमः क्रोधे श्रिया वैश्रवणोपमः॥"
"यमो वैवस्वतः अन्तकः कालः।" इति तट्टीकायां नीलकण्ठः॥)

यमी, स्त्री, यमुनानदी। इति त्रिकाण्डशेषः॥ (यथा, श्रीमद्भागवते। ८। १३। ९।
"छतीयां वड़वामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

यमुना, स्त्री, (यमयतीति। यमि+"अजियमिशीङ्भ्यश्च।" उणा॰ ३। ६१। इति उनन्। टाप्।) दुर्गा। यथा,—
"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥
सङ्गमात्गमनाद्गङ्गा लोके देवी विभाव्यते।
यमस्य भगिनी जाता यमुना तेन सा मता॥"
इति देवीपुराणे ४५ अध्यायः॥ * ॥

यच्छति विरमति गङ्गायामिति। नदीविशेषः। सा तु हिमालयदक्षिणदेशान्निर्गत्य प्रयागे गङ्गायां मिश्रिता। तत्पर्य्यायः। कालिन्दी २ सूर्य्यतनया ३ शमनस्वसा ४। इत्यमरः।२।१०।३२॥ तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ श्यामा ८ तापी ९ कलिन्दनन्दिनी १० यमनी ११ यमी १२। इति शब्दरत्नावली॥ कलिन्दशैलजा १३ सूर्य्यसुता १४। इति जटाधरः॥ (यथा,—
"गङ्गा सरस्वती शोणयमुना सरयूः शची।
वेणा इरावती नीला उत्तरात् पूर्व्ववाहिनी॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)

अस्या जलगुणाः। पित्तदाहवमनश्रमापहत्वम्। स्वादुत्वम्। वातजननत्वम्। पावनत्वम्। वह्निदीपनकरत्वम्। रोचनत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ * ॥ सा यमस्य भगिनी। यथा,—
"सावर्णिर्मनुरग्र्यं तु तपो घोरं चकार ह।
अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे॥
भ्राता शनैश्चरश्चास्य ग्रहत्वं स तु लब्धवान्।
तयोर्यवीयसी या तु यमस्वसा यशस्विनी।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी॥"
इति वह्निपुराणे सागरोपाख्यानम्॥ * ॥
सा च वृन्दावने सुषुम्नाख्या परा शक्तिः। यथा,
श्रीभगवानुवाच।
"इदं वृन्दावनं रम्यं मम धामैव केवलम्।
तत्र ये पशवः साक्षाद्वृक्षाः कीटा नराधमाः।
ये वसन्ति ममाधिष्ठं मृता यान्ति ममान्तिकम्॥
तत्र या गोपपत्न्यश्च निवसन्ति ममालये।
योगिन्यस्तात! एवं हि मम देवाः परायणाः॥
पञ्चयोजनमेवं हि वनं मे देहरूपकम्।
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी॥"
इति पाद्मे पातालखण्डे ७ अध्यायः॥ * ॥
अस्या जलस्य कृष्णवर्णत्वकारणं यथा,—
पुलस्त्य उवाच।
"यदा दक्षसुता ब्रह्मन्! सती याता यमक्षयम्।
विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः॥
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः।
अपत्नीकं तदास्त्रेण उन्मादेनाभ्यताड़यत्॥
ततो हरः शरेणाथ उन्मादेनाभिताड़ितः।
विचचार तदोन्मत्तः काननानि सरांसि च॥
स्मरन् सतीं महादेवस्तथोन्मादेन ताड़ितः।
न शर्म्म लेभे देवर्षे बाणविद्ध इव द्विपः॥
ततः पपात देवेशः कालिन्दीसरिते मुने।
निमग्ने शङ्करे चापे दग्धा कृष्णत्वमागता॥
तदाप्रभृति कालिन्द्या भृगाञ्जननिभं जलम्॥"
इति वामने ६ अध्यायः॥ * ॥
ज्यैष्ठशुक्लद्वादश्यादिष्वस्यां स्नानपिण्डदानफलं यथा,—
"ज्यैष्ठशुक्लद्वादश्यां स्नात्वा वै यमुनाजले।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम!।
ज्यैष्ठामूलामले पक्षे द्वादश्यामुपवासकृत्॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्॥
ज्यैष्ठे तु ?सिते पक्षे समभ्यर्च्य जनार्द्दनम्।
धन्यो नः पिण्डनिर्व्वापं यमुनायां प्रदास्यति॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः॥

यमुनाजनकः, पुं, (यमुनाया जनकः।) सूर्य्यः। इति हेमचन्द्रः। २। ९॥

यमुनाभित्, [द्] पुं, (यमुनां भिनत्तीति। भिद्+क्विप्।) बलदेवः। इति हेमचन्द्रः। २।१३८॥ (एतद्वृत्तान्तमुक्तं यथा, हरिवंशे। १०२। ३४—३६।
"स हलेनानताग्रेण कूले गृह्य महानदीम्।
चकर्ष यमुनां रामो व्युत्थितां वनितामिव॥
सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता॥")

यमुनाभ्राता, [ऋ] पुं, (यमुनाया भ्राता।) यमः। इत्यमरः। १। १। ६१॥

यमेरुका, स्त्री, (यमं ईरयति प्रेरयतीति। ईर+बाहुलकात् उकः। टाप्।) दण्डका। इति त्रिकाण्डशेषः॥

ययातिः, पुं, नहुषराजपुत्त्रः। तत्पर्य्यायः। नाहुषिः २। इति त्रिकाण्डशेषः॥ नाहुषः ३। इति जटाधरः॥ तस्योपाख्यानं यथा,—
"नहुषस्य प्रवक्ष्यामि पुत्त्रान् सप्तैव धार्म्मिकान्।
यतिर्ययातिः संयातिरुद्भवः पञ्चमस्तथा॥
स्वयातिर्मेघयातिश्च सप्तैते वंशवर्द्धनाः।
ययातिरकरोद्राज्यं धर्म्मैकशरणस्तदा॥
शर्म्मिष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः।
भार्गवस्याङ्गजा तद्वद्देवयानी च सुव्रता॥
ययातिर्द्देवयान्यान्तु पुत्त्रावजनयन्नृपः।
यदुञ्च तुर्व्वसुञ्चैव शक्रविष्णू इवापरौ॥
तस्मादेव तु राजर्षेः शर्म्मिष्ठा वार्षपर्व्वणी।
द्रुह्युञ्चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत्॥
ततः काले च कस्मिंश्चिद्देवयानी शुचिस्मिता।
ययातिसहिता राजन् जगाम हरितं वनम्॥
ददर्श च तदा तत्र कुमारान् देवरूपिणः।
क्रीड़मानान् सुविश्रब्धान् विस्मिता चेदमब्रवीत्॥
किन्नामधेयं गोत्रं वः पुत्त्रकाः! ब्राह्मणः पिता।
विब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं ह्यहम्॥
तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम्।
श्रुत्वा च तत्त्वतो देवी शर्म्मिष्ठामिदमब्रवीत्॥
ममाधीना सती कस्मादकार्षीर्विप्रियं मम॥
शर्म्मिष्ठोवाच।
यदा तया वृतो राजा वृत एव तदा मया।
भर्त्ता हि मे पूज्यतमो राजर्षिः किं न वेत्सि तत्॥
शौनक उवाच।
श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृतम्॥
अविप्लवन्ती किञ्चिच्च राजानं साश्रुलोचना।
अचिरादेव संप्राप्ता काव्यस्योशनसोऽन्तिके॥
देवयान्युवाच।
शर्म्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्व्वणः।
त्रयोऽस्यां जनिताः पुत्त्रा राज्ञानेन ययातिना।
दुर्भगाया मम द्वौ तु पुत्त्रौ तात! ब्रवीमि वः॥
शुक्र उवाच।
धर्म्मज्ञः सन् महाराज! योऽधर्म्ममकृथाः प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्ज्जया॥
ययातिरुवाच।
ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति स च धर्म्मेषु भ्रूणहेत्युच्यते बुधैः॥